संस्कृतवार्ता:

दिनाङ्क :-23.12.2024

प्रात: - 06:55

पीएम-रोजगर मेलापकम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवनियुक्तेभ्यः एकसप्ततिः सहस्राधिकानि नियुक्तिपत्राणि वीडियो कॉन्फ्रेंसिंग इति आभासीय माध्यमेन वितरिष्यति। अस्मिन् अवसरे श्रीमोदी एकां सभाम् अपि सम्बोधयिष्यति। अस्माकं संवाददात्रानुसारी रोजगार-मेलापाकस्य आयोजनं देशे पञ्चचत्वारिंशत् स्थानेषु आयोजितः भविष्यति। नवनियुक्ताः गृहमंत्रालये, प्रैष्य विभागे, उच्चशिक्षायां, स्वास्थ्य परिवारकल्याण मंत्रालये, वित्तीयसेवादिषु मन्त्रालयेषु विभिन्नेषु विभागेषु च नियोजिताः भविष्यन्ति। वृत्यअवसर मेलापकं यूनां मध्ये वृत्यवसराणां सृजनं सर्वोच्चप्राथमिकतां प्रदातुं प्रधानमन्त्रिणः प्रतिबद्धतायाः पूर्तये एकं सोपानम् अस्ति। राष्ट्रनिर्माणे आत्मसशक्तिकरणे च यूनां सहभागितायै सार्थकान् अवसरान् प्रददाति।

प्रधानमन्त्री- क्रिसमस

अद्य नवदिल्ल्यां क्रिसमस-उत्सवे प्रधानमन्त्री नरेन्द्रमोदी भागं गृह्णीयात्। अस्य कार्यक्रमस्य आयोजनं भारतस्य कैथोलिक-बिशप-सम्मेलन इत्यनेन क्रियते। प्रधानमन्त्री क्रिश्चियनसमुदायस्य प्रमुखनेतृभिः सह संवादं करिष्यति, यस्मिन् कार्डिनल्, बिशपा चर्च इत्यस्य प्रमुखाः नेतारः च सम्मिलिताः भवन्ति। देशे कैथोलिकचर्च इत्यस्य मुख्यालये एतादृशे कार्यक्रमे प्रधानमन्त्री प्रथमवारं भागं गृह्णीयात्।

जितेन्द्र-सुशासन

कार्मिक-लोक-परिवाद-राज्यमंत्री डॉ. जितेन्द्रसिंहः अद्य नवदिल्ल्यां सुशासन-प्रथानां राष्ट्रिय कार्यशालायाः उद्घाटनं करिष्यति। कार्यशालायां सर्वेषां मन्त्रालयानाम् विभागानां च अधिकारिणः भागं गृह्णन्ति। डॉ. सिंहः मूल्याङ्कनप्रतिवेदनस्य विमोचनेन सह विभिन्नैः मन्त्रालयैः विभागैः च स्वच्छताभियानस्य चत्वारि दशमलव शून्यं इत्यस्य उत्तमप्रथानां एकस्याः प्रदर्शन्याः उद्घाटनं अपि करिष्यति। चतुर्थसुशासनसप्ताहस्य अवसरे प्रधानमन्त्री नरेन्द्रमोदी स्वसन्देशे उक्तवान् यत् सुशासनं राष्ट्रस्य प्रगतेः कुञ्जीका अस्ति। सः अवदत् यत् जनानां समग्रकल्याणाय, उत्तमाय च कार्येषु पारदर्शिता, कुशलता, उत्तरदायी च प्रशासनं प्रदातुं महत्त्वपूर्णः पक्षः अस्ति।

कृषकदिवसः

अद्य सम्पूर्णे देशे राष्ट्रियकृषकदिवसः आचर्यते। अस्मिन् दिने राष्ट्रस्य विकासाय कृषकाणां योगदानस्य सम्मानम् भवति। दिवसोऽयं खाद्यसुरक्षां सुनिश्चित्य, ग्रामीण-अर्थव्यवस्थानां स्थायित्वं, देशस्य कृषिविरासतां च संरक्षितुं कृषकाणां महत्त्वपूर्णायाः भूमिकायाः स्मारकरूपेण अपि कार्यं करोति।कृषकाणां महत्त्वपूर्णां भूमिकां स्वीकृत्य तेषां सामाजिक-आर्थिक-उत्थानस्य समर्थनाय सर्वकारेण नैके उपक्रमाः कृताः तथा च स्थायिकृषिवृद्धिं सुनिश्चितं करोति।

एतेषु कार्यक्रमेषु प्रधानमन्त्री-किसान-सम्मान-निधि, प्रधानमन्त्री-फसल-बीमा-योजना, प्रधानमन्त्री-किसान-मानधन-योजना च अन्तर्भवन्ति । एतासां योजनानां अन्तर्गतं कृषकाणां कृते वित्तीयसुरक्षा, समाह्वाननिवारणं, दीर्घकालीनसामाजिकसुरक्षा च प्रदीयते।

महिलाक्रिकेट्- परिणामः

महिलाक्रिकेट्-क्रीडायां ह्यः वडोदरा-नगरे तिसृणां-क्रीडानां आईसीसी-चैम्पियनशिप-श्रृङ्खलायाः प्रथमायां एकदिवसीय-क्रीडायां भारतेन वेस्ट्-इण्डीज-दलं एकादशोत्तर द्विशतं धावनान्कैः पराजितम्।

।।इति वार्ताः।।